# पञ्चदिवसीया अन्ताराष्ट्रिया शोध-सङ्गोष्ठी

(प्रत्यक्षा आभासीया चोभयविधा)

## (5-Days Inter-National Research Seminar)

(Dual Mode)

**(17.08.2026 तः 21.08.2026 यावत्)**

मुख्यविषयः (Central Theme)

## वर्तमानवैश्विकसमस्यानां संस्कृतवाङ्मयाधारितसमाधानानि

(Sanskrit Literature–Based Solutions to Contemporary Global Challenges)



संरक्षकः

(प्रो. श्रीनिवासवरखेडी)

कुलपतिः,के.सं.वि.वि.



मुख्यमार्गदर्शकः

(प्रो.आर्.जी. मुरलीकृष्णः)

कुलसचिवः, के.सं.वि.वि.






मार्गदर्शकः

प्रो. कुलदीपशर्मा

आदर्शयोजनाधिकारी



कार्यक्रमनिर्देशकः

डॉ. विष्णुदत्तशर्मा

प्राचार्यः

**कार्यक्रमसंयोजकः – डॉ. राकेशकुमारजैनः, समन्वयकः, शोधकेन्द्रम्**

आयोजकम्

**शोधकेन्द्रम् (Research Center)**

श्रीदीवान-कृष्ण-किशोर-सनातन-धर्म-आदर्श-संस्कृत-महाविद्यालयः,अम्बाला (हरियाणा)

(केन्द्रीयसंस्कृतविश्वविद्यालयेन सम्बद्धम्)

॥ पावका नः सरस्वती ॥



# पञ्चदिवसीया अन्ताराष्ट्रिया शोधसङ्गोष्ठी
# प्रतिवेदनम्

शिक्षामन्त्रालयभारतसर्वकारस्य आदर्शसंस्कृतमहाविद्यालययोजनान्तर्गते केन्द्रीयसंस्कृतविश्वविद्यालयेन सम्बद्धे
श्रीदीवान्-कृष्ण-किशोर-

## सनातनधर्मआदर्शसंस्कृतमहाविद्यालये शोधकेन्द्रे च

### अम्बालाछावनी हरियाणा

## सङ्गोष्ठ्याः उद्देश्यानि

1. भारतीयज्ञानपरम्परायाः विनिमयः शोधप्रवृत्तिवर्धनञ्च ।
2. शास्त्राणाम् आधुनिकविषयैः सह अन्तर्विद्याशाखीय-अनुसन्धानम्
3. वैश्विकस्तरे संस्कृतवाङ्मयस्य प्रासङ्गिकतास्थापनम् ।
4. युवशोधच्छात्राणां शोधपत्रवाचनक्षमतायाः विकासः ।
5. हाइब्रेडमाध्यमेन वैश्विकविद्वत्सु अकादमिकसम्बन्धसुदृढीकरणम् ।

शिक्षामन्त्रालयभारतसर्वकारस्यआदर्शयोजनान्तर्गते

नवदेहलीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयेन सम्बद्धे

अम्बालाछावनीस्थे श्रीदीवान-कृष्ण-किशोर-

# सनातन-धर्म-आदर्श-संस्कृत-महाविद्यालये

17.08.2026 तः 21.08.2026 यावत् आयोज्यते

# पञ्चदिवसीया अन्ताराष्ट्रिया शोधसङ्गोष्ठी

# उद्घाटनसत्रम्

(17.08.2026)

# उद्घाटनसत्रम्

17.08.2026 (प्रातः 11.00 वादनतः12.30 वादनं यावत्)



**मुख्यातिथिः – प्रो. रमेशकुमारपाण्डेयः**

कुलपतिचरः-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयःनवदेहली।
अध्यक्षः- संस्कृतभारती।



**सत्राध्यक्षः–प्रो. राजेश्वरप्रसादमिश्रः**

पूर्व-अधिष्ठाता, अध्यक्षचरश्च संस्कृतविभागः, कुरुक्षेत्रविश्वविद्यालयः कुरुक्षेत्रम्।



**सारस्वतातिथिः** – Dr. Kamdev Jha, Ex-Principal, D.A.V. College, Pihowa, Kurukshetra.



**विशिष्टातिथिः –डॉ.मीनाक्षीश्रीनिवासन**

Founder Principal and PRO, Sydney Sanskrit School,
School of Vedic Sciences, (Aust) Inc NSW, Australia



**विशिष्टातिथिः – प्रो. डम्बरुधरपतिः**

Department - Hindi & Sanskrit The University of Fiji
Saweni Campus, Fiji & 2nd Secretary, High Commission of India Suva, Fiji

## निवेदकाः

| | | |
|---|---|---|
| डॉ. राकेशकुमारजैनः<br>संयोजकः | महाविद्यालयपरिवारश्च | डॉ.विष्णुदत्तशर्मा<br>प्राचार्यः |

श्री दीवान-कृष्ण-किशोर-

# सनातन-धर्म-आदर्श-संस्कृत-महाविद्यालयः शोधकेन्द्रञ्च

अम्बालाछावनी, हरियाणा

## पञ्चदिवसीया अन्ताराष्ट्रिया शोधसङ्गोष्ठी

(17.08.2026 तः 21.08.2026 यावत्)

## उद्घाटनसत्रम्

(17.08.2026)

प्रातः 11: 00 वादनतः 12:30 वादनं यावत्

- सरस्वत्यर्चनम् – मञ्चस्थैः (3 निमेषाः)
- वैदिकमङ्गलाचरणम् –डॉ.मनीषभारद्वाजः (2 निमेषाः)
- लौकिकमङ्गलाचरणम् – डॉ.बुद्धिबल्लभदेवराड़ी (2 निमेषाः)
- कुलगीतम् – (तकनीकीसहयोगः) (4 निमेषाः)
- अतिथिस्वागतं परिचयश्च - डॉ.विष्णुदत्तशर्मा (प्राचार्यः) (3 निमेषाः)
  - सत्राध्यक्षः – प्रो. राजेश्वरप्रसादमिश्रः, पूर्व-अधिष्ठाता, अध्यक्षचरश्च संस्कृतविभागः, कुरुक्षेत्रविश्वविद्यालयः, कुरुक्षेत्रम्
  - मुख्यातिथिः – प्रो. रमेशकुमारपाण्डेयः, कुलपतिचरः, श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः, देहली , अखिलभारतीयाध्यक्षः-संस्कृतभारती
  - सारस्वतातिथिः – प्रो.कामदेवझाः, पूर्वप्राचार्यः, डी.ए.वी.कॉलेज, पिहोवा, कुरुक्षेत्रम्
  - विशिष्टातिथिः – प्रो. मीनाक्षीश्रीनिवासन - Founder Principal and PRO, Sydney Sanskrit School, School of Vedic Sciences, (Aust) Inc NSW, Australia
  - विशिष्टातिथिः - प्रो. डम्बरुधरपतिः - Department - Hindi & Sanskrit The University of Fiji Saweni Campus, Fiji & 2nd Secretary, High Commission of India Suva, Fiji
- प्रास्ताविकम् – डॉ. राकेशकुमारजैनः, संयोजकः (5 निमेषाः)
- उद्बोधनम् – प्रो. डम्बरुधरपतिः (12 निमेषाः)
- उद्बोधनम् – डॉ. मीनाक्षीश्रीनिवासन (12 निमेषाः)
- मुख्यातिथेरुद्बोधनम् – प्रो. रमेशकुमारपाण्डेयः (12 निमेषाः)
- सारस्वतातिथेरुद्बोधनम् – डॉ.कामदेवझाः (12 निमेषाः)
- अध्यक्षीयभाषणम् - प्रो.राजेश्वरप्रसादमिश्रः (12 निमेषाः)
- धन्यवादज्ञापनम् – डॉ. श्यामनाथझाः (3 निमेषाः)

सत्र-सञ्चालकः (8 निमेषाः)
डॉ. विपिनकुमारः

## उद्घाटनविवरणम्

पञ्चदिवसीय-अन्ताराष्ट्रिय-शोधसङ्गोष्ठ्याः उद्घाटनसत्रं 17.08.2026 दिनाङ्के समायोजितम्। अस्य सत्रस्य उद्घाटनं सरस्वत्यर्चनेन दीपप्रज्वालनेन च अतिथिभिः विद्वद्भिश्च विहितम्। कार्यक्रमस्य प्रारम्भे मङ्गालाचरणं महाविद्यालयस्य प्राध्यापकौ डॉ.मनीषभारद्वाजः डॉ.बुद्धिबल्लभश्च अकार्ष्टाम्। तदनन्तरं कुलगीतं सर्वे सम्भूय तकनीकीमाध्यमेन अगासिषुः। महाविद्यालयस्य प्राचार्यः **डॉ.विष्णुशर्मा** समेषाम् आगतानां विदुषाम् अतिथीनां वक्तॄणां श्रोतॄणाञ्च परिचयपुरस्सरं स्वागतमकार्षीत्। अस्याः पञ्चदिवसीय-अन्ताराष्ट्रिय-शोध-सङ्गोष्ठ्याः स्वरूपं प्रयोजनञ्च सङ्गोष्ठीसंयोजकेन **डॉ. राकेशकुमारजैनेन** प्रास्ताविकरूपेण उपन्यस्तम्। फिजिदेशतः **विशिष्टातिथिः प्रो.डम्बरूधरपतिरासीत्।** तेन संस्कृतशिक्षकाणां संस्कृतच्छात्राणाञ्च उत्तरदायित्वानां कर्तव्यानाञ्च निर्वहणाय नाना आप्तवचनानि प्रस्तुतानि। आस्ट्रेलियादेशतः विशिष्टातिथिः **प्रो.मीनाक्षीश्रीनिवासन** आसीत्। तया च देशेषु विदेशेषु च स्वभाषासंरक्षणोपायाः निगदिताः। अस्य कार्यक्रमस्य मुख्यातिथिना संस्कृतभारत्याः अखिलभारतीयाध्यक्षेण **प्रो.रमेशचन्द्रपाण्डेयवर्येण** वैश्विकसमस्यानां समाधानाय नैकानि वाङ्मयस्थाप्तवचनानि उक्तानि। सारस्वतातिथिना **डॉ.कामदेवझावर्येण** शाकुन्तलाध्ययनेन वर्तमाने विद्यमानानां बहूनां समस्यानां समाधानानि अवाचि। सत्राध्यक्षेण **प्रो.राजेश्वरप्रसादमिश्रेण** भारतीयज्ञानपरम्परायाः माहात्म्यं तस्याः प्रासङ्गिकताश्च अबोधि। सत्रस्य सञ्चालनं **डॉ.विपिनकुमारेण** अकारि। सर्वान्ते महाविद्यालयस्य सहाचार्येण **डॉ.श्यामनाथझावर्येण** धन्यवादज्ञापनं व्याहृतम्। राष्ट्रगीतेन सभायाः समापनं जातम्।

## विचारमौक्तिकाः

- सम्पूर्णं विश्वं युद्धग्रस्तं वर्तते। परस्परं विद्वेषः जायमानः वर्तते। तदर्थं **'वसुधैव कुटुम्बकम्'** इति भावः सर्वैरपि पालनीयः।
- "**मा भ्राता भ्रातरं द्विक्षन् स्वसारमुतः स्वसा**" इति वेदवचनमनिवार्यत्वेन पालनीयम्।
- समाजे विवाहविच्छेदः, जातिप्रथा, धर्मवादश्चेत्यादीनां कुरीतीनां निवारणाय अस्याः सङ्गोष्ठ्याः महत्त्वमधिकम्।
- सर्वासां समस्यानां सार्वत्रिक-सार्वकालिकसमाधानं एतादृशैः विचारैरेव भवितुमर्हन्ती-त्याहुः विद्वांसः।

# उद्घाटनसत्रे समुपस्थिताः विद्वांसः












Ambala Cantt, Haryana, India
Jagadhari Road, Tribune Colony, Ambala Cantt, Haryana 133001, India
Lat 30.340429° Long 76.849685°
Monday, 17/08/2026 11:31 AM GMT +05:30
Google


11:35
LTE
D.K.K.S.D. ADARSH SANSKRIT COLLEGE, AMBALA CANTT
Dr. Dambarudhar Pati - FIJI
Mangat Ram
Meena Srinivasan
Narender Sharma
Soniya Sharma
archit
Abdul Aziz Manda
डॉ मनीष भारद्वाज


अनुवाद

# समाचारपत्रेषु उद्घाटनसत्रम्



RNI No. : GUJSAN/2011/39893

दैनिकं संस्कृतवार्तापत्रम्

विश्वस्य वृत्तान्तः

Vishvasya Vrutantam
(Sanskrit Daily Newspaper)

संपादक

प्रकाशकः

e-mail : vishvasya.vrutantam@gmail.com ■ Whatsapp No. : 8780434516

एक्शन अवतार मध्ये निवर्तिष्यते इमरान हाशमी, 'गनमास्टर G9' इत्यस्य 2

अमितशाहः उक्तवान्— मतपेटिकालोभेन काङ्ग्रेसेन 'वन्देमातरम्' विस्मृतम् 5

विद्यालयेषु अध्ययनरताभ्यः १० लक्षाधिकाभ्यः बालिकाभ्यः निःशुल्कं स्वच्छतासाधनं 6

## पञ्चदिवसीय-अन्ताराष्ट्रिय-शोधसङ्गोष्ठी

(डॉ.विपिनकुमारः)

श्रीदीवान-कृष्ण-किशोर-सनातन-धर्म-आदर्श-संस्कृत-कॉलेज एवं शोधकेन्द्र- अम्बाला- छावनीस्थे हरियाणाप्रान्ते पञ्चदिवसीय-अन्ताराष्ट्रिय-शोधसङ्गोष्ठ्याः उद्घाटनसत्रं 17.08.2026 दिनाङ्के समायोजितम्। अस्य सत्रस्य उद्घाटनं सरस्वत्यर्चनेन दीपप्रज्वालनेन च अतिथिभिः विद्वद्भिश्च विहितम्। फिजिदेशतः विशिष्टातिथिः प्रो.डम्बरुधरपतिरासीत्। तेन संस्कृतशिक्षकाणां संस्कृतच्छात्राणाञ्च उत्तरदायित्वानां कर्तव्यानाञ्च निर्वहणाय नाना आप्तवचनानि प्रस्तुतानि।

आस्ट्रेलियादेशतः विशिष्टातिथिः प्रो. मीनाक्षीश्रीनिवासन आसीत्। तया च देशेषु विदेशेषु च स्वभाषासंरक्षणोपायाः निगदिताः। अस्य कार्यक्रमस्य मुख्यातिथिना संस्कृतभारत्याः अखिलभारतीयाध्यक्षेण प्रो.रमेशचन्द्रपाण्डेयवर्येण वैश्विकसमस्यानां समाधानाय नैकानि वाङ्मयस्थाप्तवचनानि उक्तानि। सारस्वतातिथिना डॉ.कामदेवझावर्येण शाकुन्तलाध्ययनेन वर्तमाने विद्यमानानां बहूनां समस्यानां समाधानानि अवाचि। सत्राध्यक्षेण प्रो. राजेश्वरप्रसादमिश्रेण भारतीयज्ञानपरम्परायाः माहात्म्यं तस्याः प्रासङ्गिकताश्च अबोधि। कार्यक्रमस्य प्रारम्भे मङ्गलाचरणं महाविद्यालयस्य प्राध्यापकौ डॉ.मनीषभारद्वाजः डॉ.बुद्धिवल्लभश्च अकार्ष्टाम्। महाविद्यालयस्य प्राचार्यः डॉ.विष्णुशर्मा समेषाम् आगतानां विदुषाम् अतिथीनां वक्तॄणां श्रोतृणाञ्च परिचयपुरस्सरं स्वागतमकार्षीत्। अस्याः पञ्चदिवसीय-अन्ताराष्ट्रिय-शोध-सङ्गोष्ठ्याः स्वरूपं प्रयोजनञ्च सङ्गोष्ठ्याः संयोजकेन डॉ. राकेशकुमारजैनेन प्रास्ताविकरूपेण उपन्यस्तम्।

# सनातन धर्म आदर्श संस्कृत कॉलेज एवं शोध संस्थान द्वारा पाँच दिवसीय अतरराष्ट्रीय संगोष्ठी आयोजित

अंबाला हलचल

अंबाला। सनातन धर्म आदर्श संस्कृत कॉलेज एवं शोध संस्थान, अंबाला छावनी में आयोजित पाँच दिवसीय अतरराष्ट्रीय संगोष्ठी का प्रथम दिवस गंभीर एवं समसामयिक विषयों पर विचार - विमर्श के साथ संपन्न हुआ। संगोष्ठी के उद्घाटन सत्र का शुभारंभ दिनांक - 17 अगस्त 2026 को प्रातः 11 बजे हुआ, जिसमें देश - विदेश से जुड़े शिक्षाविदों, विषय - मर्मज्ञों एवं विश्वविद्यालयों के प्रतिष्ठित संस्कृत आचार्यों, वेदाचार्यों, व्याकरणाचार्यों, ज्योतिषाचार्यों एवं साहित्याचार्यों ने सहभागिता की। संगोष्ठी में जलवायु परिवर्तन, युद्ध, विस्थापन, सामाजिक विषमता और मानसिक एकाकीपन जैसी गंभीर वैश्विक चुनौतियों पर भारतीय शास्त्रों के दृष्टिकोण से व्यापक विचार - विमर्श किया गया। विद्वानों ने इस बात पर जोर दिया कि प्राचीन भारतीय ज्ञान परंपरा में निहित मानवीय मूल्यों और जीवन - दृष्टि का उपयोग वर्तमान विश्व की जटिल समस्याओं के समाधान के लिए किया जा सकता है। उद्घाटन सत्र में महाविद्यालय के प्राचार्य डॉ. विष्णुदत्त शर्मा जी ने सभी अतिथियों का स्वागत - सत्कार किया। संगोष्ठी के संयोजक डॉ. राकेश कुमार जैन जी ने संगोष्ठी की प्रस्तावना प्रस्तुत करते हुए इसके उद्देश्य और विषय - वस्तु पर प्रकाश डाला। सत्र में फिजी से जुड़े डॉ. ईश्वरचंद्र पति जी, ऑस्ट्रेलिया से जुड़ी प्रोफेसर मीनाक्षी





श्रीनिवासन जी, कुरुक्षेत्र विश्वविद्यालय के पूर्व संस्कृत विभागाध्यक्ष प्रो. ललितेश्वर मिश्र तथा लालबहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली के पूर्व कुलपति प्रो. रमेश पाण्डेय ने अपने विचार व्यक्त करते हुए भारतीय ज्ञान परंपरा की प्रासंगिकता पर प्रकाश डाला और संगोष्ठी के सफल आयोजन के लिए शुभकामनाएं दीं। सत्र का संचालन डॉ. विपिन कुमार नेकिया, जबकि डॉ. श्यामनाथ झा ने सभी अतिथियों एवं प्रतिभागियों का आभार व्यक्त किया। इस अवसर पर महाविद्यालय के प्राध्यापक डॉ. मनोज कुमार चौ., डॉ. नितिन कुमार, डॉ. गगनदीप सिंह, डॉ. वीरेंद्र प्रकाश, डॉ. रेणुबाला, डॉ. बद्रीनारायण देवरही, डॉ. वीरेंद्र शर्मा सहित अन्य सभी शिक्षक एवं गैर - शैक्षणिक कर्मचारी भी उपस्थित रहे। अतरराष्ट्रीय स्तर पर आयोजित यह संगोष्ठी भारतीय संस्कृत एवं शास्त्रीय ज्ञान परंपरा को वैश्विक चुनौतियों के समाधान से जोड़ने की दिशा में महत्वपूर्ण पहल मानी जा रही है।

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

E-mail: sanskritsamvad@gmail.com www.sanskritsamvad.com

# अम्बालाछावनीस्थे आदर्शसंस्कृतमहाविद्यालये पञ्चदिवसीय-अन्ताराष्ट्रियसंगोष्ठ्याः भव्योद्घाटनम्

–राकेशकुमारजैनः

श्रीदीवान-कृष्ण-किशोर-सनातन-धर्म-आदर्श-संस्कृत-कॉलेज एवं शोधकेन्द्र-अम्बाला- छावनीस्थे हरियाणाप्रान्ते पञ्चदिवसीय- अन्ताराष्ट्रिय- शोधसङ्गोष्ठ्याः उद्घाटनसत्रं १७.०८.२०२६ दिनाङ्के समायोजितम्।



अस्य सत्रस्य उद्घाटनं सरस्वत्यर्चनेन दीपप्रज्वालनेन च अतिथिभिः विद्वद्भिश्च विहितम्। फिजिदेशतः विशिष्टातिथिः प्रो. डम्बरूधरपतिरासीत्। तेन संस्कृतशिक्षकाणां संस्कृतच्छात्राणाञ्च उत्तरदायित्वानां कर्तव्यानाञ्च निर्वहणाय नाना आप्तवचनानि प्रस्तुतानि। आस्ट्रेलियादेशतः विशिष्टातिथिः प्रो.मीनाक्षीश्रीनिवासन आसीत्। तया च देशेषु विदेशेषु च स्वभाषासंरक्षणोपायाः निगदिताः। अस्य कार्यक्रमस्य मुख्यातिथिना संस्कृतभारत्याः अखिलभारतीयाध्यक्षेण प्रो.रमेशचन्द्रपाण्डेयवर्येण वैश्विकसमस्यानां समाधानाय नैकानि वाङ्मयस्थाप्तवचनानि उक्तानि। सारस्वतातिथिना डॉ.कामदेवझावर्येण शाकुन्तलाध्ययनेन वर्तमाने विद्यमानानां बहूनां समस्यानां समाधानानि अवाचि। सत्राध्यक्षेण प्रो.राजेश्वरप्रसादमिश्रेण भारतीयज्ञानपरम्परायाः माहात्म्यं तस्याः प्रासङ्गिकताश्च अबोधि। कार्यक्रमस्य प्रारम्भे मङ्गालाचरणं महाविद्यालयस्य प्राध्यापकौ डॉ.मनीषभारद्वाजः डॉ.बुद्धिवल्लभश्च अकार्ष्टाम् । महाविद्यालयस्य प्राचार्यः डॉ.विष्णुशर्मा समेषाम् आगतानां विदुषाम् अतिथीनां वक्तॄणां श्रोतॄणाञ्च परिचयपुरस्सरं स्वागतमकार्षीत अस्याः पञ्चदिवसीय-अन्ताराष्ट्रिय-शोध-सङ्गोष्ठ्या स्वरूपं प्रयोजनञ्च सङ्गोष्ठ्याः संयोजकेन डॉ. राकेशकुमारजैनेन प्रास्ताविकरूपेण उपन्यस्तम्। सर्वान्ते महाविद्यालयस्य सहाचार्येण डॉ.श्यामनाथझावर्येण धन्यवादज्ञापनं व्याहृतम्। सत्रस्य सञ्चालनं डॉ.विपिनकुमारेण अकारि। राष्ट्रगीतेन सभायाः समापनं जातम्। अस्मिन् पावनावसरे महाविद्यालयस्य प्राध्यापकाः डॉ.मनोजकुमार दुबे, डॉ. नितिनकुमारः, डॉ.गगनदीपसिंहः, डॉ.वीरेन्द्रप्रकाशः, डॉ.रेणूवत्सः, डॉ.वीरेन्द्रशर्मा, श्रीकमलेशः, कार्यालयीयकर्मचारिणः छात्राश्च समुपस्थिताः आसन्।

# अम्बाला में 5 दिवसीय अंतर्राष्ट्रीय संस्कृत संगोष्ठी का शुभारंभ

अम्बाला, 18 अगस्त (मनीष): सनातन धर्म आदर्श संस्कृत कॉलेज एवं शोध संस्थान, अम्बाला छावनी में 5 दिवसीय अंतर्राष्ट्रीय संगोष्ठी का शुभारंभ हुआ। उद्घाटन सत्र में देश-विदेश से पहुंचे विद्वानों ने जलवायु परिवर्तन, युद्ध, विस्थापन, सामाजिक विषमता और मानसिक एकाकीपन जैसी वैश्विक चुनौतियों पर भारतीय शास्त्रों के दृष्टिकोण से विचार रखे।

प्राचार्य डा. विष्णु दत्त शर्मा ने अतिथियों का स्वागत किया। संयोजक डा. राकेश कुमार जैन ने संगोष्ठी की प्रस्ताविकी प्रस्तुत की। फिजी से जुड़े डा. डबकर पति, ऑस्ट्रेलिया से जुड़ी प्रो. मीनाक्षी श्रीनिवासन, कुरुक्षेत्र विश्वविद्यालय से प्रो. राजेश्वर मिश्र तथा लालबहादुर शास्त्री विश्वविद्यालय से जुड़े प्रो. रमेश पाण्डेय ने अपने विचार रखे। मंच का संचालन डा. विपिन कुमार ने किया तथा डा. श्यामनाथ झा ने धन्यवाद ज्ञापित किया। इस अवसर पर डा. मनोज कुमार दुबे, डा. नितिन कुमार,



पंच दिवसीय अंतर्राष्ट्रीय संगोष्ठी को संबोधित करते हुए वक्ता। (पंजाब केसरी)

डा. गगनदीप सिंह, डा. वीरेंद्र प्रकाश व डा. वीरेंद्र शर्मा सहित महाविद्यालय के शैक्षणिक एवं गैर-शैक्षणिक कर्मचारी उपस्थित रहे।

# पञ्चदिवसीय अन्ताराष्ट्रिय शोधसङ्गोष्ठी




**डॉ. विपिन कुमारः**
**(चैतन्य लोक)**

श्रीदीवान कृष्ण किशोर सनातन धर्म आदर्श संस्कृत कॉलेज एवं शोधकेन्द्र अम्बाला छावनीस्थे हरियाणाप्रान्ते पञ्चदिवसीय अन्ताराष्ट्रिय शोधसङ्गोष्ठ्याः उद्घाटनसत्रं 17.08.2026 दिनाङ्के समायोजितम्। अस्य सत्रस्य उद्घाटनं सरस्वत्यर्चनेन दीपप्रज्वालनेन च अतिथिभिः विद्वद्भिश्च विहितम्। फिजिदेशतः विशिष्टातिथिः प्रो. डम्बरूधरपतिरासीत्। तेन संस्कृतशिक्षकाणां संस्कृतच्छात्राणाञ्च उत्तरदायित्वानां कर्तव्यानाञ्च निर्वहणाय नाना आप्तवचनानि प्रस्तुतानि। आस्ट्रेलियादेशतः विशिष्टातिथिः प्रो. मीनाक्षीश्रीनिवासन आसीत्। तया च देशेषु विदेशेषु च स्वभाषासंरक्षणोपायाः निगदिताः। अस्य कार्यक्रमस्य मुख्यातिथिना संस्कृतभारत्याः अखिलभारतीयाध्यक्षेण प्रो.रमेशचन्द्रपाण्डेयवर्येण वैश्विकसमस्यानां समाधानाय नैकानि वाङ्मयस्थाप्तवचनानि उक्तानि। सारस्वतातिथिना डॉ. कामदेवझावर्येण शाकुन्तलाध्ययनेन वर्तमाने विद्यमानानां बहूनां समस्यानां समाधानानि अवाचि। सत्राध्यक्षेण प्रो. राजेश्वरप्रसादमिश्रेण भारतीयज्ञानपरम्परायाः माहात्म्यं तस्याः प्रासङ्गिकताश्च अबोधि। कार्यक्रमस्य प्रारम्भे मङ्गलाचरणं महाविद्यालयस्य प्राध्यापकौ डॉ.मनीषभारद्वाजः डॉ. बुद्धिवल्लभश्च अकार्ष्टाम्। महाविद्यालयस्य प्राचार्यः डॉ.विष्णुशर्मा समेषाम् आगतानां विदुषाम् अतिथीनां वक्तृणां श्रोतृणाञ्च परिचयपुरस्सरं स्वागतमकार्षीत्। अस्याः पञ्चदिवसीय अन्ताराष्ट्रिय शोध सङ्गोष्ठ्या स्वरूपं प्रयोजनञ्च सङ्गोष्ठ्याः संयोजकेन डॉ. राकेशकुमारजैनेन प्रास्ताविकरूपेण उपन्यस्तम्। सर्वान्ते महाविद्यालयस्य सहाचार्येण डॉ. श्यामनाथझावर्येण धन्यवादज्ञापनं व्याहृतम्। सत्रस्य सञ्चालनं डॉ. विपिनकुमारेण अकारि। राष्ट्रगीतेन सभायाः समापनं जातम्। अस्मिन् पावनावसरे महाविद्यालयस्य प्राध्यापकाः डॉ. मनोजकुमार दुबे, डॉ. नितिनकुमारः, डॉ. गगनदीपसिंहः, डॉ. वीरेन्द्रप्रकाशः, डॉ. रेणूवत्सः, डॉ. वीरेन्द्रशर्मा, श्रीकमलेशः, कार्यालयीयकर्मचारिणः छात्राश्च समुपस्थिताः आसन्।




# विभागाः

| | |
|---|---|
| 1. वेदविभागीयसत्रम् | 17.08.2026 |
| 2. व्याकरणविभागीयसत्रम् | 18.08.2026 |
| 3. ज्योतिषविभागीयसत्रम् | 19.08.2026 |
| 4. साहित्यविभागीयसत्रम् | 20.08.2026 |
| 5. आधुनिकविभागीयसत्रम् | 21.08.2026 |

# वेदविभागीयसत्रम्

## (17.08.2026)




**उपविषयाः –**

- वेदेषु पर्यावरणसंरक्षणस्य अवधारणा।
- वैदिकदृष्ट्या विश्वशान्तेः स्वरूपम्।
- वेदेषु सततविकासस्य (Sustainable Development) आधाराः।
- वैदिकशिक्षादर्शनस्य समकालीनप्रासङ्गिकता।
- वेदेषु स्वास्थ्यचिन्तनम्।
- ऋग्वेदे मानवैक्यस्य भावना।
- वैदिकयज्ञपरम्परायाः वैज्ञानिकपक्षः।
- वेदेषु जलसंरक्षणस्य महत्त्वम्।
- वेदेषु नारीस्थानम्।
- वेदाः वैश्विककल्याणस्य मूलाधारः।

# प्रथमसत्रम्

## (मध्याह्ने 2.00 वादनतः 4.00 वादनं यावत्)



**सत्राध्यक्षः –प्रो. राजेश्वरप्रसादमिश्रः**

**पूर्वाधिष्ठाता विभागाध्यक्षश्चसंस्कृत-पालि-प्राकृतविभागः,**
**कुरुक्षेत्रविश्वविद्यालयः, कुरुक्षेत्रम्**



**सारस्वतातिथिः – प्रो. मनोजकुमारमिश्रः**

**आचार्यः विभागाध्यक्षश्च – वेदविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नासिकपरिसरः**

### सत्रविवरणम्

पञ्चदिवसीय-अन्ताराष्ट्रीय-शोधसङ्गोष्ठ्याः प्रथमं सत्रं वेदसत्रत्वेन जातम्। सर्वादौ मङ्गलाचरणेन अस्य सत्रस्य शुभारम्भः जातः। तच्च वेदविभागस्य प्राध्यापकः **डॉ.मनीषभारद्वाजेन** कृतम्। ततः परं समागतानां विदुषाम् अतिथीनां वाक्पुष्पैः उत्तरीयवस्त्रेण च स्वागतं वेदविभागप्रभारी **डॉ.नितिनकुमारेण** अकारि। सत्राध्यक्षः **प्रो. राजेश्वरप्रसादमिश्रः** सारस्वततिथिः **प्रो. मनोजकुमारमिश्रः** चास्ताम्। "**वर्तमानवैश्विकसमस्यानां संस्कृतवाङ्मयाधारितसमाधानम्**" इत्यमुं विषमवलम्ब्य विद्वद्भिः शोधपत्रवाचकैश्च चर्चा कृता। अस्मिन् सत्रे विभिन्नस्थानात् आगतैः विद्वद्भिः शोधार्थिभिश्च प्रायः 23 शोधपत्राणां प्रस्तुतीकरणं कृतम्। अस्मिन् अवसरे डीएवी महाविद्यालयस्य **पूर्वप्राचार्यः डॉ.कामदेवझा**वर्यस्यापि उपस्थितिरासीत्। **सत्राध्यक्षः** वर्तमानसमाजस्य विविधसमस्याः समुपस्थाप्य तेषां समाधानानि, शिक्षकस्य दायित्वम्, तेषां भूमिका, वैचारिकपरिष्कारस्य आवश्यकता इत्यादीन् विषयान् आधारीकृत्य अत्यन्तं सारगर्भितम्, मार्गदर्शकं शिक्षाप्रदं च व्याख्यानमददात्। **सारस्वततिथिना** अपि विषयसम्बद्धः अत्यन्तं महत्त्वपूर्णः विचारः प्रस्तुतः। तेन प्रतिपादितं यत्—"**मनुष्यः स्वयमेव अनेकाः समस्याः जनयति तथा स्वयमेव तासां समाधानस्य निदानस्य च अन्वेषणं करोति**"। अतः वर्तमानसमस्यानां सार्वकालिकसमाधानाय आत्मावलोकनम्, विवेकेन चिन्तनम्, नैतिकचिन्तनं तथा वैदिकवाङ्मयस्य जीवनदृष्टिः अत्यन्तम् आवश्यकम् अस्ति। वेदवाङ्मयं मानवस्य आन्तरिकपरिष्कारं, नैतिकमूल्यानि, सामाजिकसमरसतां तथा लोककल्याणस्य भावनां प्रतिष्ठापयति। अतः वर्तमानवैश्विकसमस्यानां संस्कृतवाङ्मयाधारितसमाधानस्य दिशि वेदवाङ्मयस्य योगदानम् अत्यन्तं महत्त्वपूर्णं वर्तते। सत्रान्ते अतिथीनां विदुषाञ्च धन्यवादज्ञापनं **डॉ. नितिनकुमारजोशिना** कृतम्। सत्रस्य सञ्चालनं **डॉ.मनीषभारद्वाजः** अकार्षीत्। सत्रेऽस्मिन् शोधपत्रवाचकानां इतिवृत्तं अधः प्रस्तूयते-

| क्र.सं. | शोधपत्रवाचकाः | विवरणम् |
| --- | --- | --- |
| 1. | Dr. Anita Nain | Assistant Prof. Babu Anant Ram Janta College, Kaul, Kaithal<br>विषय: आधुनिक युग में वेदों की महत्ता |
| 2. | Dr. Reeja | Assistant Prof. — Dayanand Mahila Mahavidyalaya, Kurukshetra<br>विषय: वेदों में पर्यावरण संरक्षण की अवधारणा |
| 3. | Dr. Nitin Kumar | Lecturer, D.K.K.S.D. Adarsh Sanskrit College, Ambala Cantt.<br>विषय: वैदिक साहित्य में नारी विमर्श |
| 4. | Dr. Bibhuti Bhushan Mohapatra | Assistant Prof., Rajdhani College, Bhubaneswar, Odisha<br>विषय:- Status of Paippalada Samhita Studies in Odisha |
| 5. | Gour Prasad Panda | Assistant Prof. (G), Department of Darshan, Central Sanskrit University, Jaipur Campus, Jaipur<br>विषय:- उपनिषत्सु विश्वशान्तेः स्वरूपम् एकं दार्शनिकं समीक्षणम् |
| 6. | Dr. Mahima Tiwari | Assistant Prof. — Central Sanskrit University, Bhopal Campus, Bhopal<br>विषय: - वैदिकशिक्षादर्शनस्य समकालीनप्रासङ्गिकता |
| 7. | Dr. T. S. Srisailam | Assistant Prof. & Head — Sri Sankara Arts and Science College, Enathur, Kanchipuram, Tamil Nadu<br>विषय:- वैदिकसाहित्ये पर्यावरणसन्तुलनं वन्यजीवमहत्त्वं च |
| 8. | Dr. Dhanesh Kumar Pandey | Assistant Prof. — Himachal Adarsh Sanskrit SnatakottarMahavidyalaya, Jangla, Chirgaon, Rohru, Shimla<br>विषय:-यज्ञ विधियों का वैज्ञानिक स्वरूप |
| 9. | Dr. Rajnish Kumar Pandey | Guest Teacher Ved — Central Sanskrit University, Jaipur Campus, Jaipur<br>विषय:-वेदाध्ययनस्य दृष्टादृष्टफलराद्धान्तः |
| 10. | Dr. Sunita Devi | Associate Prof. — Punjab University, Chandigarh |

| | | |
|---|---|---|
| | | विषयः- गृहस्थाश्रम में नारी की भूमिका |
| **11.** | Dr. Anay Mani Tripathi | Assistant Prof. — Central Sanskrit University, Shri Maharaja Ranbir Singh Campus, Kot-Bhalwal, Jammu<br>विषयः- शुक्लयजुर्वेद में सामाजिक मूल्यों की अवधारणा |
| **12.** | Dr. Durga Saran Rath | Assistant Prof. — Central Sanskrit University, Shri Raghunath Kirti Campus, Devaprayag<br>विषयः-वेदाः वैश्विककल्याणस्य आधारभूताः |
| **13.** | Dr. Maneesh Bhardwaj | Assistant Prof. (G), DKKSD Adarsh Sanskrit College Ambala Cantt, Haryana<br>विषयः- वेदेषु स्वास्थ्यचिन्तनम् |
| **14.** | Monika Chattha | Research Scholar — Department of Sanskrit, Pali&Prakrit, Kurukshetra University, Kurukshetra<br>विषयः- तैत्तिरीयारण्यक के परिप्रेक्ष्य में पितृमेध यज्ञ |
| **15.** | Shivani | Research Scholar — Punjab University, Chandigarh<br>विषयः- शिवसंकल्प सूक्त में मन की अवधारणा |
| **16.** | Madhumita Guchhait | Ph.D. Research Scholar — Central University of Odisha<br>विषयः- वेदेषु नारीस्थानम् |
| **17.** | Dr. Kusum Lata | Researcher — Delhi University<br>विषयः- वैदिक याज्ञिक मूल्यों से सामाजिक चेतना एवं पर्यावरण संरक्षण: एक विचार |
| **18.** | Anil Kumar | Research Scholar — Kurukshetra University, Kurukshetra<br>विषयः त्रिपादविभूतिमहानारायणोपनिषद् में ब्रह्म के पाद चतुष्टय का स्वरूप |
| **19.** | Priyanka | Research Scholar — Department of Sanskrit, Pali & Prakrit, Kurukshetra University, Kurukshetra<br>विषयः सांख्य दर्शन में आन्तरिक तत्त्वों का प्रबन्धन पर्यावरणीय दृष्टि से |
| **20.** | Dr. Vineet Kumar Shukla | Researcher — Sampurnanand Sanskrit University, Varanasi<br>विषयः वेदाः वैश्विककल्याणस्य मूलाधारः |
| **21.** | Monika | Ph.D. Research Scholar — Punjab University, Chandigarh<br>विषयः वेदों में पर्यावरण संरक्षण |

| | | |
|---|---|---|
| 22 | SHUBHAM MISHRA | Assistant Professor, (Cont) वेंकटेश्वर वैदिकविश्वविद्यालयः, तिरुपति, आन्ध्रप्रदेशः<br>विषयः- वेदेषु विज्ञानम् |
| 23 | Dr. S. KRISHNA | Assistant Professor, CSU Bhopal Campus<br>विषयः- वेदों में मानवीय सम्मान |

**विभागप्रभारी** **सत्रसञ्चालकः**

**डॉ. नितिनकुमारः** **डॉ.मनीषभारद्वाजः**

# वेदसत्रे समुपस्थिताः विद्वांसः









# विचारमौक्तिकाः

1. वेदेषु मानवजीवनस्य, समाजस्य, प्रकृतेः तथा लोककल्याणस्य सम्यग्दृष्टिः निहिता अस्ति।

2. वेदवाङ्मयं मानसिकाशान्तेः, नैतिकमूल्यह्रासस्य, सामाजिकवैमनस्यस्य, पर्यावरणसंकटस्य, हिंसासंघर्षस्य तथा पारिवारिकविघटनस्य समाधानाय मार्गदर्शनं करोति।

3. वेदाः सत्यं, ऋतं, धर्मं, आत्मसंयमं, सदाचारं, परस्परसहयोगं, प्रकृतिसंरक्षणं तथा "सर्वे भवन्तु सुखिनः" इति लोककल्याणभावनां प्रतिष्ठापयन्ति।

4.इहलौकिक-पारलौकिकञ्च समस्यानां समाधानं ददति वेदाः।

5.मनुर्भव जनया दैव्यं जनम् इति प्रतिपदं सन्देशं यच्छन्ति मानवेभ्यः।

*****

# व्याकरणविभागीयसत्रम्

# (18.08.2026)




➢ **उपविषयाः –**

- पाणिनीयव्याकरणस्य वैज्ञानिकता आधुनिकविज्ञानस्य च सम्बन्धः।
- व्याकरणशास्त्रस्य कृत्रिमबुद्धिमत्ताविकासे योगदानम्।
- संस्कृतव्याकरणाधारितप्राकृतिकभाषासंसाधनम् (NLP)।
- व्याकरणे शब्दब्रह्मसिद्धान्तस्य आधुनिकप्रासङ्गिकता।
- महाभाष्ये संवादसंस्कृतिः चिन्तनपरम्परा च।
- व्याकरणशास्त्रस्य तार्किकचिन्तनविकासे योगदानम्।
- व्याकरणं भाषासंरक्षणं च।
- व्याकरणस्य अन्तरविषयकप्रासङ्गिकता।
- वाक्यार्थबोधस्य आधुनिकभाषाविज्ञानदृष्ट्या समीक्षा।
- पाणिनीयव्याकरणस्य वैश्विकोपयोगिता।

# प्रथमसत्रम्

(मध्याह्ने 1.30 वादनतः 3.00 वादनं यावत्)



**सत्राध्यक्षः – डॉ.कामदेवझाः**

**पूर्वप्राचार्यः-डी.ए.वी.कॉलेज,पिहोवा, कुरुक्षेत्रम् (हरियाणा)**



**सारस्वतातिथिः –डॉ.दीपेश विनोद कतिरा**

**सहायकाचार्यः-भारतीयज्ञानप्रणाली उत्कृष्टताकेन्द्रम्,**

**भारतीयप्रौद्योगिकीसंस्थानम्,खडकपुरम् (पश्चिमबङ्गम्)**

## प्रथमसत्र-विवरणम्

श्रीदीवान-कृष्ण-किशोर-सनातन-धर्म-आदर्श-संस्कृत-कॉलेज,अम्बालाछावनीस्थे हरियाणा प्रान्ते पञ्चदिवसीय-अन्ताराष्ट्रिय-शोधसङ्गोष्ठ्याः द्वितीये दिवसे व्याकरणविभागीयसत्रम् 18.08.2026 तमे दिनाङ्के समायोजितम्। दीपप्रज्वालनेन सरस्वत्यर्चनेन च सत्राध्यक्षः **डॉ.कामदेवझाः प्राचार्यः डॉ.विष्णुदत्तशर्मा** आभ्यां सत्रस्यारम्भः कृतः। प्राचार्येण सत्राध्यक्षस्य पुष्पमालया उत्तरीयवस्त्रेण च सम्माननं अकारि। व्याकरणविभागाध्यक्षेण **डॉ.विपिनकुमारेण** सत्रस्य प्रास्ताविकं समुपस्थाप्य अधिवेदे विराजमानानां सत्राध्यक्षणां सारस्वतातिथीनाञ्च परिचयपुरस्सरं स्वागतं व्याहृतम्। अस्य सत्रद्वयमासीत्। प्रथमे सत्रे सत्राध्यक्षत्वेन **डॉ.कामदेवझाः** (डीएवी कॉलेज पिहोवा, कुरुक्षेत्रम्) सारस्वतातिथित्वेन च **डॉ.दीपेशकतिरा** (भारतीयप्रौद्योगिकीसंस्थानम्, खडकपुरम्) आस्ताम्। अस्मिनह्नि सप्त शोधपत्रवाचकाः शोधपत्रं अपाठिषुः। सर्वादौ **डॉ.श्रीओम शर्मणा** पाणिनेः कृत्रिबुद्धिमत्तायाः प्राचीनत्वं समुपस्थाप्य आधुनिकयुगे तस्याश्च समन्वयं अद्राक्षीत्। वैश्विकभाषागतसमस्यानां समाधाने पाणिनीय व्याकरणस्योपादेयता इति विभिन्नैः सूत्रैः उदाहरणैश्च अवादीत् **डॉ.किरणखिंची** महोदया। डॉ. देवब्रतपण्डा आधुनिकपरिप्रेक्ष्ये व्याकरणदर्शनस्य प्रासङ्गिकता अथ च शब्दब्रह्मसिद्धान्तस्य कृत्रिमबुद्धिमत्या सह सामञ्जस्यं इत्यमुं विषयम् अगदत्। अतः परं **डॉ.राहुल शर्मणा** पाणिनीयव्याकरणम् आल्गोरिद्मिक-शिक्षणपद्धतिरूपेण सिद्धान्तकौमुदीतः पौष्पीप्रक्रियापर्यन्तम् इति विषयस्य माहात्म्यं प्रतिपादितम्। सारस्वतातिथिना **डॉ.दीपेशवर्येण 'संस्कृत भाषा विज्ञान और आधुनिक भारतीय भाषाओं का संवर्धन'** इति विषयमुररीकृत्य भाषासंरक्षणोपायाः प्रौद्योगिक्याः तत्र भूमिका, अनेकासु भाषासु विद्यमानानां संस्कृतदैनिकशब्दानां बाहुल्यम् इति उदाहरण-प्रत्युदाहरणैः स्पष्टीकृताः। **सत्राध्यक्षेण व्याकरणाध्ययनाध्यापनस्य क्रमाणां विवेचनम् अपि च व्याकरणनिकाये स्फोटपरम्परायाः सैद्धान्तिकं प्रायोगिकञ्च** पक्षमबलम्ब्य तस्याः

वर्तमानकाले उपादेयता चेत्यादयः वर्तमानवैश्विकभाषागतसमस्यानां समाधानाय नैकान्योदाहरणानि दृष्टान्तसिद्धान्तपुरस्सरं शास्त्रीयरीत्या विशदीकृताः। **सत्रसञ्चालनं धन्यवादज्ञापनञ्च डॉ.विपिनकुमारः** अकार्षीत्।

**शोधपत्रप्रस्तोतारः**

| क्र. | शोधपत्रवाचकाः | विवरणम् |
|---|---|---|
| 1. | **Dr. SHRIOM SHARMA** | Assistant Professor, Shri Bhagwandas Adarsh Sanskrit Mahavidyalaya, Haridwar, Uttarakhand<br>विषयः- व्याकरणशास्त्रस्य कृत्रिमबुद्धिमत्ताविकासेऽवदानम् |
| 2. | **Dr. KIRAN KHINCHI** | Asst Professor-Vyakarana, CSU Jaipur Campus<br>विषयः-पाणिनीयव्याकरणस्य वैश्विकोपयोगिता |
| 3. | **ANJU RANI** | Ph.D Scholar, Sanskrit, Pali & Prakrit Department, Kurukshetra University Kurukshetra<br>विषयः- पाणिनीय व्याकरण में 'स्त्रियाम्' सूत्रस्थ लिङ्गत्रय विश्लेषण |
| 4. | **NEHA** | Research Scholar,Department of Sanskrit, Allahabad University, Prayagaraj,<br>विषयः- हैम व्याकरण में प्रयुक्त शब्द एवं वाक्य स्वरूपलक्षण की अर्थसमीक्षा |
| 5. | **Dr. DEBABRATA PANDA** | Assistant Professor, Dept. of Sanskrit, MSCB UNIVERSITY, BARIPADA, ODISHA<br>विषयः - शब्दब्रह्मसिद्धान्तस्य आधुनिकपरिप्रेक्ष्ये प्रासङ्गिकता |
| 6. | **Dr. RAHUL SHARMA** | Assistant Professor, Radhamadhava Aadarsh Sanskrit Mahavidyalaya,Manipur<br>विषयः-पाणिनीयव्याकरणम् आल्गोरिद्मिक-शिक्षणपद्धतिरूपेण : सिद्धान्तकौमुदीतः पौष्पीप्रक्रियापर्यन्तम् |
| 7. | **सारस्वतातिथिः उद्बोधनम्- Dr. DIPESH VINOD KATIRA**<br>Assistant Professor- Centre of Excellence for Indian Knowledge Systems, IIT Kharagpur<br>विषयः- संस्कृत-भाषा-विज्ञान और आधुनिक भारतीय भाषाओं का संवर्धन | |
| **अध्यक्षीय उद्बोधनम्- डॉ.कामदेवझाः**<br>**धन्यवादज्ञापनम्- डॉ.विपिनकुमारः** | | |
| **विभागप्रभारी**<br>**डॉ.विपिनकुमारः** | | **सत्रसञ्चालकः**<br>**डॉ.विपिनकुमारः** |

# द्वितीयसत्रम्

**समयः- मध्याह्ने 3.00 तः 4.30 यावत्**



**सत्राध्यक्षः – डॉ.प्रियव्रतमिश्रः**

सहाचार्यः-व्याकरणविभागः,संस्कृतविद्याधर्मविज्ञानसंकायः
काशीहिन्दूविश्वविद्यालयः,



**सारस्वतातिथिः- डॉ. रामचन्द्रः**

सहाचार्यः-संस्कृतविभागः, कुरुक्षेत्रविश्वविद्यालयः,कुरुक्षेत्रम्

## द्वितीयसत्र-विवरणम्

द्वितीये सत्रे सत्राध्यक्षत्वपदं **डॉ.प्रियव्रतमिश्रः** सारस्वतातिथित्वपदं **डॉ.रामचन्द्रश्च** व्यराजिष्टाम्। अमुष्मिन् सत्रे द्वादश शोधपत्रप्रस्तोतार: स्वशोधपत्रवाचनमकार्षु:। अत्र शोधपत्रवाचकाः **'वैश्विकभाषागतसमस्यानां समाधाने कृत्रिमबुद्धिमत्तायाः प्रयोगेण विशुद्धशब्दानाञ्च निर्माणं कथं कुर्युः'** इति समस्या-समाधानपुरस्सरं शोधपत्रमवोचन्। अत्र सारस्वतातिथिना **डॉ.रामचन्द्रेण 'महाभाष्ये संवादसंस्कृतिः चिन्तन परम्परा चेति'** विषयमवलब्यं महाभाष्यस्थ-बहूनि लौकिकोदाहरणानि प्रदर्श्य तेषां सामाजिकोपयोगिता उपादेयता च अवारीत्। तैः पृषोदरादीनि यथोपदिष्टमिति सूत्रमनुसृत्य शिष्टानां लक्षणं प्रोक्तम्।

सत्राध्यक्षेण महाभाष्यस्य सम्वादशैल्याः महत्त्वं प्रतिपाद्य महाभाष्ये विषयाणां विस्फारणं सिद्धान्तानां प्रकटीकरणं भगवता भाष्यकारेण महता परिश्रमेण सहजतया सरसतया च प्रसारितमित्यादयः विषयाः बहुभिः उदाहरणैः दृष्टान्तैः सिद्धान्तैश्च प्रकाशिताः । **आचार्याः तन्तुवायसम्वादः, व्याकरणे भाविनीसञ्ज्ञा, प्रत्यभिज्ञा, सर्वेषु सूत्रेषु किञ्चित् लौकिकं दृष्टान्तं** प्रदर्श्य गूढगूढतरं विषयं सरसा तरसा च भाष्यकारेण प्रतिपादितमिति उदाहरणान्यनुसृत्य अब्रूवन्। भाष्यकृताशयः प्रदर्श्य विभिन्नानां व्याकरणानां परिचयः समासेन उक्त्वा पाणिनीयव्याकरणस्य महत्त्वमुपादेयता च अवादीषुः। अस्मिनह्नि समुपस्थितानां विदुषां शोधच्छात्राणं वक्तॄणां शिष्टानां विशिष्टानाञ्च वाक्पुष्पैः धन्यवादः व्याकरणविभागाध्यक्षेण **डॉ.विपिनकुमारेण** व्याहृतः। सत्रस्य सञ्चालनं **डॉ.रेणूवत्सः** अकार्षीत्। द्वितीयसत्रस्य विवरणमधः प्रस्तूयते-

| क्र. | शोधपत्रवाचकाः | विवरणम् |
|---|---|---|
| 1. | Dr.VED PRAKASH MISHRA | Education Officer-cum-Research Associate, Bharatiya Shiksha Board<br>विषयः- महाभाष्ये संवादसंस्कृतिः चिन्तन परम्परा च |

| | | |
|---|---|---|
| 2. | **Dr. ADITYA PRAKASH** | Assistant Professor, Akhil Bhartiya Sanskrit -Hindi Vidyapeeth, Khamhar, Begusarai, Bihar,<br>विषयः- व्याकरणं भाषासंरक्षणं च |
| 3. | **CHANDRAMA POUDYAL** | Research Scholar, CSU NASHIK CAMPUS<br>विषयः- व्याकरणमहाभाष्यस्थ संवादप्रणाल्यामध्ययनपरम्परा |
| 4. | **MANGAT RAM** | Ph.D Scholar, Kurukshetra University, Kurukshetra<br>विषयः- माध्यन्दिन शतपथ ब्राह्मण के आख्यातपदों का पाणिनीय व्याकरणाधारित वैज्ञानिक विश्लेषण |
| 5. | **MANISHA** | Ph.D Scholar, Kurukshetra University Kurukshetra<br>विषयः- अर्वाचीन-सारस्वतव्याकरणगत अच्सन्धि समालोचन (पाणिनीय व्याकरण के आलोक में) |
| 6. | **RAVINA KUMARI** | Ph.D Scholar, Kurukshetra University Kurukshetra<br>विषयः-अर्वाचीन-सारस्वतव्याकरण गत कृत्यप्रत्यय समीक्षा - (पाणिनि व्याकरण के आलोक में) |
| 7. | **NAVEEN** | Ph.D Scholar, M.V.S.U Mundri Kaithal Haryana<br>विषयः-पाणिनीय व्याकरण की वैश्विक तकनीकी उपयोगिता एवं प्रभाव |
| 8. | **REESHU** | Ph. D Scholar, M.V.S.U Mundri Kaithal Haryana<br>विषयः-श्रीमद्भागवतमहापुराणे क्रियापदानां विवेचनं विश्लेषणं च। |
| 9 | **Dr. NARENDRA KUMAR DOTOLIYA** | Public Relation Officer (PRO) Central Sanskrit University<br>विषय - पाणिनीय व्याकरण की वैश्विक उपयोगिता |
| 10 | **Gopal Krishna Mishra** | Research Scholar, Mahatma Gandhi Central University, Bihar<br>विषयः- संस्कृतव्याकरणाध्ययने डिजिटल प्रौद्योगिक्याः योगदानम् |
| 11. | **Dr.VIPIN KUMAR** | विषयः- प्राच्यार्वाचीनपरिप्रेक्ष्ये भारतीयशिक्षापरम्परा तथा व्याकरणपरम्परा : एकम् अनुशीलनम् (DKKSD Adarsh Sanskrit College,Ambala) |
| 12. | **सारस्वतातिथिः उद्बोधनम्-Dr. RAMCHANDRA**, Kurukshetra University,<br>विषयः- महाभाष्ये संवादसंस्कृतिः चिन्तन परम्परा च | |
| **अध्यक्षीय उद्बोधनम्- डॉ.प्रियव्रतमिश्रः**, संस्कृतविद्याधर्मविज्ञानसंकायः,काशीहिन्दूविश्वविद्यालयः,<br>**धन्यवादज्ञापनम्-** डॉ.रेणूवत्सः | | |
| **विभागप्रभारी**<br>**डॉ.विपिनकुमारः** | | **सत्रसञ्चालनम्**<br>**डॉ.रेणूवत्सः** |

# व्याकरणसत्रे समुपस्थिताः विद्वांसः





























शब्दसाधुत्वप्रतिपादनपुरस्सरं धर्मोपदेशः
शब्दानां व्युत्पादकं शास्त्रमस्ति।
Ambala,Haryana,India
Jagadhri Road, Tribune Colony, Ambala, Haryana
India
Lat 30.340540, Long 76.849869
Tuesday, 18/08/2026 01:54 PM GMT+05:30
Note : Captured by GPS Map Camera






GPS Map Camera
Ambala,Haryana,India
Jagadhri Road, Tribune Colony, Ambala, Haryana 133001,
India
Lat 30.340637, Long 76.850013
Tuesday, 18/08/2026 02:09 PM GMT+05:30
Note : Captured by GPS Map Camera




REC
Dr.Priyabrata Mishra, BHU
D.K.K.S.D. ADARSH SANSKRIT COLLEGE, A...
Ram Chander
Dr.NITIN KUMAR
CHANDRAMA P...
CHANDRAMA POUDYAL
GOPAL KRISHN...
GOPAL KRISHNA MISHRA
Reeshu
Naveen Mudgil
Dr. VED
DR.BRIJMOHAN SHARMA
Xiaomi 25057RN...
Xiaomi 25057RN09I
Principal S.D. Sa...
Principal S.D. Sanskrit College Ambala C...
RK
Anuj Sharma
Dr kusum lata
Karamveer Kaushik
आस्था, धर्म और काशी के रहस्य
Dr. Ashok Kumar
Dr. Virender Par...
Dr. Virender Parkash
aditya prakash
Mangat Ram
anju rani
डॉ जितेन्द्र कुमार दुबे
Virender Sharma
Audio
Video
Participants
Chat
React
Share
Host tools
Record
More
End

# विचारमौक्तिकाः

1. महाभाष्यस्य "एकः शब्दः सुज्ञातः सुप्रयुक्तः..." इति सिद्धान्तेन समाजे सत्यनिष्ठस्य, भ्रमरहितस्य च वैश्विक-सञ्चारस्य स्थापना भवति।

2. व्याकरणं "वाङ्-मल-शोधकम्" अस्ति। माहेश्वरसूत्राणाम् अष्टाध्याय्याश्च वैज्ञानिक-उच्चारणेन वाचि शुद्धता आयाति। मानसिक-स्वास्थ्यस्य संवर्धनं भवति।

3. पाणिनेः सूत्रशैली (Mathematical Algorithm) 'Natural Language Processing' (NLP) कृते सर्वोत्तमा अस्ति, येन सङ्गणक-क्षेत्रे महदनुसन्धानस्यावसरो विद्यते।

4. व्याकरणस्य "प्रकृति-प्रत्यय-व्यवस्था" ज्ञापयति यत् मानवः (प्रत्ययः) प्रकृत्या (Nature) विना जीवितुं न शक्नोति, यः सतत-विकासस्य मूलमन्त्रः अस्ति।

5. वाक्यपदीयस्य "शब्दब्रह्म" सिद्धान्तेन सम्पूर्णं विश्वम् एकस्यां चेतनायां बध्यते, येन राष्ट्रिय-विद्वेषः समाप्तः भवति।

## समाचारपत्रेषु व्याकरणविभागीया सङ्गोष्ठी

# व्याकरणविभागस्था सङ्गोष्ठी सुसम्पन्ना

चैतन्य लोक • डॉ. विपिन कुमारः
chaitanyalok.com




अम्बालाछावनीस्थे श्रीदीवान- कृष्ण-किशोर-सनातन-धर्म-आदर्श-संस्कृत-कॉलेज एवञ्च शोधकेन्द्रे पञ्चदिवसीय-अन्ताराष्ट्रिय-शोधसङ्गोष्ठ्याः द्वितीये दिवसे व्याकरणविभागीयसत्रम् 18.08.2026 तमे दिनाङ्के समायोजितम्। व्याकरणविभागेन 'वर्तमानवैश्विकभाषागतसमस्यानां वाङ्मयाधारितसमाधानानि' इति विषयमुररीकृत्य आयोजितायां सङ्गोष्ठ्यां सत्रद्वयमासीत्। प्रथमे सत्रे सत्राध्यक्षत्वेन डॉ.कामदेवझाः, सारस्वतातिथित्वेन च डॉ.दीपेशकतिरा आस्ताम्। अस्मिनहि एकादश शोधपत्रवाचकाः शोधपत्रं अपाठिषुः। सत्राध्यक्षेण व्याकरणनिकाये स्फोटपरम्परायाः सैद्धान्तिकं प्रायोगिकञ्च पक्षमवलम्ब्य महत्त्वमवादीत्। डॉ.दीपेशवर्येण भाषासंरक्षणोपायाः, अनेकासु भाषासु विद्यमानानां संस्कृतदैनिकशब्दानां बाहुल्यम् इति उदाहरण-प्रत्युदाहरणैः स्पष्टीकृताः। सत्रस्य सञ्चालनं व्याकरणविभागाध्यक्षेण डॉ.विपिनकुमारेण अकारि। द्वितीये सत्रे सत्राध्यक्षत्वपदं डॉ.प्रियव्रतमिश्रः सारस्वतातिथित्वपदं डॉ.रामचन्द्रश्च व्यराजिष्टाम्। अमुष्मिन् सत्रे एकादश शोधपत्रप्रस्तोतारः स्वशोधपत्रवाचनमकार्षुः। सारस्वतातिथिना 'महाभाष्ये संवादसंस्कृतिः चिन्तन परम्परा चे'ति विषयमवलब्यं महाभाष्यस्थ-बहूनि लौकिकोदाहरणानि प्रदर्श्य तेषां सामाजिकोपयोगिता उपादेयता च अवारीत्। सत्राध्यक्षत्वेन महाभाष्यस्य सम्वादशैल्याः महत्त्वं व्यवारि। महाभाष्ये विषयाणां विस्फारणं सिद्धान्तानां प्रकटीकरणं तन्तुवायसम्वादः, व्याकरणे भाविनीसञ्ज्ञा, प्रत्यभिज्ञा, सर्वेषु सूत्रेषु किञ्चित् लौकिकं दृष्टान्तं प्रदर्श्य गूढगूढतरं विषयं सरसा तरसा च भाष्यकारेण प्रतिपादितमिति उदाहरणान्यनुसृत्य अब्रवीत्। सत्रसञ्चालनं डॉ.रेणूवत्सः अकार्षीत् धन्यवादज्ञापनञ्च डॉ.विपिनकुमारेण विहितम्। अस्मिन् पावनावसरे महाविद्यालयस्य सर्वेऽपि प्राध्यापकाः कर्मचारिणश्च समुपस्थिताः आसन्।

RNI No. : GUJSAN/2011/39893

दैनिकं संस्कृतवार्तापत्रम्

# विश्वस्य वृत्तान्तः

शिवराज झा 'शान्तेय'
संपादक

Vishvasya Vrutantam
(Sanskrit Daily Newspaper)

मुर्तजा खंभातवाला
प्रकाशकः

■ वर्षम् - 16 ■ अङ्कः - 117 ■ विक्रमाब्दः 2083 श्रावण शुक्ल नवमी ■ e-mail : vishvasya.vrutantam@gmail.com ■ Whatsapp No. : 8780434516 ■ दिनाङ्क : 21-08-2026, शुक्रवासरः ■ पृष्ठ : 6 ■ मूल्य : रू. 5/-

## व्याकरणविभागस्था सङ्गोष्ठी सुसम्पन्ना

(डॉ.विपिनकुमारः)

अम्बालाछावनीस्थे श्रीदीवान- कृष्ण-किशोर-सनातन-धर्म-आदर्श-संस्कृत-कॉलेज एवञ्च शोधकेन्द्रे पञ्चदिवसीय-अन्ताराष्ट्रिय-शोधसङ्गोष्ठ्याः द्वितीये दिवसे व्याकरणविभागीयसत्रम् 18.08.2026 तमे दिनाङ्के समायोजितम्।




व्याकरणविभागेन 'वर्तमानवैश्विक भाषागतसमस्यानां वाङ्मया धारितसमाधानानि' इति विषयमुरीकृत्य आयोजितायां सङ्गोष्ठ्यां सत्रद्वयमासीत्। प्रथमे सत्रे सत्राध्यक्षत्वेन डॉ.कामदेवझाः, सारस्वतातिथित्वेन च डॉ.दीपेशकतिरा आस्ताम्। अस्मिनह्नि एकादश शोधपत्रवाचकाः शोधपत्रं अपाठिषुः। सत्राध्यक्षेण व्याकरणनिकाये स्फोटपरम्परायाः सैद्धान्तिकं प्रायोगिकञ्च पक्षमबलम्ब्य महत्त्वमवादीत्। डॉ.दीपेशवर्येण भाषासंरक्षणोपायाः, अनेकासु भाषासु विद्यमानानां संस्कृतदैनिकशब्दानां बाहुल्यम् इति उदाहरण-प्रत्युदाहरणैः स्पष्टीकृताः। सत्रस्य सञ्चालनं व्याकरणविभागाध्यक्षेण डॉ.विपिनकुमारेण अकारि। द्वितीये सत्रे सत्राध्यक्षत्वपदं डॉ.प्रियव्रतमिश्रः सारस्वतातिथित्वपदं डॉ.रामचन्द्रश्च व्यराजिष्टाम्। अमुष्मिन् सत्रे एकादश शोधपत्रप्रस्तोतारः स्वशोधपत्रवाचनमकार्षुः। सारस्वतातिथिना 'महाभाष्ये संवादसंस्कृतिः चिन्तन परम्परा चे'ति विषयमवलब्यं महाभाष्यस्थ-बहूनि लौकिकोदाहरणानि प्रदर्श्य तेषां सामाजिकोपयोगिता उपादेयता च अवारीत्।

सत्राध्यक्षत्वेन महाभाष्यस्य सम्वादशैल्याः महत्त्वं व्यवारि। महाभाष्ये विषयाणां विस्फारणं सिद्धान्तानां प्रकटीकरणं तन्तुवायसम्वादः, व्याकरणे भाविनीसञ्ज्ञा, प्रत्यभिज्ञा, सर्वेषु सूत्रेषु किञ्चित् लौकिकं दृष्टान्तं प्रदर्श्य गूढगूढतरं विषयं सरसा तरसा च भाष्यकारेण प्रतिपादितमिति उदाहरणान्यनुसृत्य अब्रवीत्।

सत्रसञ्चालनं डॉ.रेणूवत्सः अकार्षीत् धन्यवादज्ञापनञ्च डॉ.विपिनकुमारेण विहितम्। अस्मिन् पावनावसरे महाविद्यालयस्य सर्वेऽपि प्राध्यापकाः कर्मचारिणश्च समुपस्थिताः आसन्।

*****

# ज्योतिषविभागीयसत्रम्

## (19.08.2026)




➢ **उपविषयाः –**

- भारतीयज्योतिषस्य वैज्ञानिकाधारः।
- ज्योतिषशास्त्रे पर्यावरणीयपरिवर्तनस्य संकेताः।
- कृषिविकासे ज्योतिषशास्त्रस्य योगदानम्।
- पञ्चाङ्गस्य सामाजिकोपयोगिता।
- मुहूर्तशास्त्रस्य समकालीनप्रासङ्गिकता।
